## ⑥ वेदानां रचनाकाल:

ऋग्वेदस्य पुरुषसूक्तस्य अष्टममन्त्रस्यानुसारेण ऋगादीनां चतुर्णामपि वेदानाम् उत्पत्तिः सृष्ट्युत्पत्तिकाले एव सिद्ध्यति, ज्यौतिषगणनानुसारेण 1,95,58, सृष्ट्युत्पत्तिकालादारभ्य अद्यावधि 2010 सौरवर्षाणि, तदनुसारेण वर्षाणि व्यतीतानि इति निश्चीयते।

मैक्समूलरमहोदयेन ऋग्वेदस्य रचना 1150 ई.पू. समीपे जाता। बुद्धेन ब्राह्मणग्रन्थेषु बुद्धधर्मोदयात् प्रागेव च ब्राह्मणग्रन्था अपि प्ररच्यत। अपि च उपनिषत्सम-विवेचितानामेव यागविधीनां आलोचना क्रियते स्म, अतः बुद्धात् पूर्ववर्तिनां स्थितिं कतिपयतत्त्वजातमात्मसात् क्रियते स्म, अतः बुद्धात् पूर्वत्तना वैदिकसाहित्यं यतार्थ (500 ई.पू.) एव ब्रह्मणोपनिषद्कोशाः सम्भवति। वैदिकसाहित्यं चतुर्षु युगाति– छन्दोयुगम्, मन्त्रयुगम्, ब्राह्मणयुगम्, सूत्रयुगश्च। प्रत्येकयुगविकासाय तत्र 200 वर्षस्य कालखण्डः स्वीकृतः। अस्य मान्यता अस्ति शाक्यमुनेः बुद्धात् 600 वर्षपूर्वमेव, अर्थात् 1200 ई. पूर्वमेव छन्दोयुगस्य अस्तित्वम् आसीत। इत्थम् ऋग्वेदस्य रचनाकालः 1200+2010=3210 वर्षेभ्यः पूर्वमेव भवितुं शक्नोति।

डॉ. अविनाशचन्द्रदासमतम् - अयं महानुभवः वेदे निर्दिष्टानि अनेकानि भूगर्भशास्त्रीयतत्त्वानि विशेषतः आर्यावर्तस्य चतुर्दिक्षु चतुः समुद्रीस्थितिमाधारीकृत्य गणनाद्वारा वेदस्य समयं 25 सहस्रसंवत्सरपूर्वं प्रकटतयाऽनेन मन्यते। इदमीयं मतं "ऋग्वैदिक इण्डिया" नामके पुस्तके प्रतिपादितम्।

बालगङ्गाधर तिलकमतम् - वैदिककालविषयकः सिद्धान्तः अपि ज्यौतिषशास्त्रमेव अनुसरति, महापुरुषोऽयं स्वीकरोति यत् ऋग्वैदिकमन्त्राणां रचनाकालः 4000 B.C. इत्यारभ्य 6000 B.C. यावत् प्राचीनः भवितुं शक्नोति, तिलकमहोदयेन वैदिककालश्चतुर्धा विभक्तः–

1. अदितिकालः - 6000 ई पूर्वतः 4000 पूर्वपर्यन्तम्,
2. मृगशिरःकालः - 4000 " 2500 ई पूर्वपर्यन्तम्,
3. कृत्तिकाकालः - 2500 " 1400 " ।
4. अन्तिमः कालः - 1400 " 500 " ।

वेबर महोदयस्य मतम् - History of India Literature नामकपुस्तके कथितं यद् वेदाः 1500 B.C इति मन्यते।

जैकोबी महोदयस्य मतम् - अनेन महोदयेन ऋग्वेदस्य मण्डूकसूक्तस्य ऋचाम् अधिकृत्य ज्योतिषगणनानुसारेण वैदिकरचनाकालः 2500 B.C इति

भवति।

पं. शंकर-बालकृष्ण दीक्षितस्य मतम् - अनेन महोदयेन ज्यौतिषगणनया शतपथब्राह्मणस्य रचनाकालः 3000 B.C इति स्वीकरोति। शतपथब्राह्मणादपि प्राचीनतरः ऋग्वेदः तस्य मते 3500 B.C. इति भवितुं शक्यते,

विण्टरनित्ज महोदयेन मतम् - वैदिकभाषायाः पारस्परिकतुलनात्मक अध्ययनेन ऋग्वेदस्य रचनाकालः 4500 इत्यारभ्य 6000 इति कालस्य मध्यवर्ती कालखण्डः स्वीकृतः।

वेदस्थितज्यौतिषतत्त्वाधारं मतम् - भारते षड् ऋतवो भवन्ति, अमी ऋतवः सूर्यसंक्रमणनिमित्तकाः। इदमपि प्रसिद्धं यत् प्राचीनकालादधुनापर्यन्तमपि ऋतवः पश्चात्प्रसर्पन्ति, वेदोक्तज्यौतिषतत्त्वानुसारेण वेदानां 2500 ई.पू. पूर्वकालिकता प्रतीता भवति।

शिलालेखस्य समयः - वैदिकरचनाकालः शिलालेखस्य आधारोपरि 2000 ई.पू. सिद्ध्यति। अयं कालनिर्णयः तिलकस्य मतं सन्निकृष्टं करोति।

संस्कृतवाङ्मये वेदानां रक्षणार्थं षट्शास्त्राणि अङ्गभूतानि सन्ति -

शिक्षा व्याकरणं छन्दो निरुक्तं ज्योतिषं तथा।
कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिणः॥

Shot on Y83 Pro
vivo dual camera